श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

चोलसिंहपुरं दोड्डयाचार्य कृतं

# ॥ श्रीयोगलक्ष्मीनरसिंह सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीयोगलक्ष्मीनरसिंह सुप्रभातम् ॥

कौसल्यासुप्रजाराम पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल ! कर्तव्यं दैवमाह्निकम् ॥

उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मङ्गळं कुरु ॥

मातः सुधाफललते ! महनीयशीले !
वक्षोविहाररसिके ! नृहरेरजस्रम्।
क्षीराम्बुराशितनये ! श्रितकल्पवल्लि !
श्रीमन्नृसिंहदयिते ! तव सुप्रभातम् ॥ 1 ॥

तव सुप्रभातमनवद्यवैभवे
घटिकेशसद्गुणनिवासभूतले।
घटिताखिलार्थघटिकाद्रिशेखरे
घटिकाद्रिनाथदयिते ! दयानिधे ॥ 2 ॥

अत्र्यादिका मुनिगणा विरचय्य सन्ध्यां
दिव्यस्रवन्मधुझरीकसरोरुहाणि।
पादार्पणाय परिगृह्य पुरः प्रपन्नाः
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम् ॥ 3 ॥

सप्तर्षिसङ्घकृतसंस्तुतिसुप्रसन्न !
श्रीमन्नृसिंह गुणरूप रमामहीभ्याम्।

सार्कं नृसिंहगिरिसत्त्वकृताधिवास !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम् ॥ 4 ॥

देवारिभञ्जनमरुत्सुतदत्तशङ्ख -
चक्रातपत्रितफणीश्वरपत्रिशेषिन्।
देवेन्द्रमुख्यसुरपूजितपादपद्म
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम् ॥ 5 ॥

स्वामिन् ! सुरेश ! मधुरेश ! समाहितार्थ
ध्यानप्रवीण ! विनतावनजागरूक।
सर्वज्ञ ! सन्ततसमीरितसर्ववृत्त !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम् ॥ 6 ॥

प्रह्लादरक्षणनिदानकृतावतार !
मुग्धस्वकीयनखरैः स्फुटितारिवक्षः।
सर्वाभिवन्द्यनिजवैभव चन्द्रकान्त !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम् ॥ 7 ॥

भक्तोचितादिसरसः सुगुणं प्रकृष्टं
तीर्थं सुवर्णघटपूरितमादरेण।
धृत्वा श्रुतिप्रवचनैकपरा लसन्ति
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम् ॥ 8 ॥

संश्लाघनीयपरमोत्तररङ्गवासि -
सूरिस्तुतिप्रथितविग्रहकान्तिकान्त।
सद्भिः समर्चितपदाम्बुज ! साधुरक्षिन्
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम् ॥ 9 ॥

तीर्थानि गोमुखगतान्यखिलानि धृत्वा
भव्यानि भव्यनिकराः परितो लसन्ति।
गायन्ति गानचतुरास्तव दिव्यवृत्तं
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ **10**॥

वाराणसीप्रथितविष्णुपदीप्रयाग -
विख्यातविश्वनतसद्घटिकाचलेन्द्र।
सम्प्रार्थितार्थपरिदानकृतैकदीक्ष !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ **11**॥

पार्श्वद्वयस्थितरमामहिशोभमान !
श्रीचोलसिंहपुरभाग्यकृतावतार।
स्वामिन् सुशील सुलभाश्रितपारिजात !
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ **12**॥

श्रीश्रीनिवासघनदेशिकवर्यभक्ति -
संवर्धितप्रतिदिनोत्सवशोभमान।
कल्याणचेलकनकोज्ज्वलभूषणाढ्य
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ **13**॥

श्रीब्रह्मतीर्थतटमागतमञ्जनाभं
देवं प्रणम्य वरदं घटिकाद्रिमेत्य।
वाधूलमानिधिमहागुरुरेष आस्ते
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ **14**॥

आचार्यपूरुषवरा ह्यभिरामवृद्धा
अर्हाभिपूज्यतर मङ्गलवस्तुहस्ताः।
त्वत्पादपङ्कजसिषेविषया प्रपन्नाः
श्रीमन्नृसिंह ! विजयीभव सुप्रभातम्॥ **15**॥

श्रीमन्नृसिंहगिरिशेखरसुप्रभातं
    ये मानवाः प्रतिदिनं पठितुं प्रवृत्ताः।
तेभ्यः प्रसन्नवदनः कमलासहायः
    सर्वाणि वाञ्छितफलानि ददाति कामम्॥ **16** ॥

॥ इति श्रीयोगलक्ष्मीनरसिंह सुप्रभातं समाप्तम्॥